श्रीसायीश्वराय नमः। हरिः ॐ।

śrīsāyīśvarāya namaḥ | hariḥ om |

॥प्रतिपूरुषं॥

||pratipūruṣaṁ||

प्रतिपूरुषमेककपालान्निर्वपत्येक मतिरिक्तं यावन्तो गृह्या स्मस्तेभ्यः कमकरं पशुनाग्ं शर्माऽसि शर्म यजमानस्य शर्म मे यछ्छैक एव रुद्रो न द्वितीयाय तस्थ आखुस्ते रुद्र पशुस्तं जुषस्त्वैषते रुद्र भागः सह स्वस्राऽम्बिकयआ तं जुषस्व भेषजं गवेऽश्वाय पुरुषाय भेषजमथो अस्मभ्यं भेषजग्ं सुभेषजं यथासति।

pratipūruṣamekakapālānnirvapatyeka matiriktaṁ yāvanto gṛhyā smastebhyaḥ kamakaraṁ paśunāgṁ śarmā'si śarma yajamānasya śarma me yachchaika eva rudro na dvitīyāya tastha ākhuste rudra paśustaṁ juṣastvaiṣate rudra bhāgaḥ saha svasrā'mbikayaā taṁ juṣasva bheṣajaṁ gave'śvāya puruṣāya bheṣajamatho asmabhyaṁ bheṣajagṁ subheṣajaṁ yathāsati|

सुगं मेषाय मेष्या अवाम्ब रुद्रमदिमह्यव देवं त्र्यंबकं। यथा नः श्रेयसः करद्यथा नो वस्यसः करद्यथा नः पशुमतः करद्यथा नो व्यवसाय यत्। त्र्यंबकं यजामहे सुगंधिम् पुष्टिवर्धनं। उर्वारुक मिवबंधना न्मृत्यो र्मुक्षीय मामृतात्। एषते रुद्र भागस्तं जुषस्व तेनाऽवसेन परो मूजवतोऽती ह्यवततधन्व पिनाकहस्तः कृत्तिवासाः॥

sugaṁ meṣāya meṣyā avāmba rudramadimahyava devaṁ tryambakaṁ| yathā naḥ śreyasaḥ karadyathā no vasyasaḥ karadyathā naḥ paśumataḥ karadyathā no vyavasāya yat| tryambakaṁ yajāmahe sugandhim puṣṭivardhanaṁ| urvāruka mivabandhanā nmṛtyo rmukṣīya māmṛtāt| eṣate rudra bhāgastaṁ juṣasva tenā'vasena paro mūjavato'tī hyavatatadhanva pinākahastaḥ kṛttivāsāḥ||

प्रतिपूरुष मेककपाला न्निर्वपति। जाता एव प्रजा रुद्रान्निरवदयते। एकमतिरिक्तं। जनिष्यमाणा एव प्रजारुद्रान्निरवदयते। एककपाला भवन्ति। एकदैव रुद्रन्निरवदयते। नाभिघारयति। यदभिघारयेत्। अन्तरव चारिणग्ं रुद्रं कुर्यात्।

pratipūruṣa mekakapālā nnirvapati| jātā eva prajā rudrānniravadayate| ekamatiriktaṁ| janiṣyamāṇā eva prajārudrānniravadayate| ekakapālā bhavanti| ekadaiva rudranniravadayate| nābhighārayati| yadabhighārayet| antarava cāriṇagṁ rudraṁ kuryāt|

एकोल्मुकेनयन्ति। तद्धि रुद्रस्य भागधेयं। इमां दिशं यन्ति। एषा वै रुद्रस्य दिक्। स्वायामेव दिशि रुद्रन्निरवदयते।

ekolmukenayanti| taddhi rudrasya bhāgadheyaṁ| imāṁ diśaṁ yanti| eṣā vai rudrasya dik| svāyāmeva diśi rudranniravadayate|

रुद्रो वा अपशुकाया आहुत्यै ना तिष्ठत। असौते पशुरिति निर्दिशेद्यं द्विष्यात्। यमेव द्वेष्टि। तमस्मै पशुं निर्दिशति। यदि न द्विष्यात्। आखुस्ते पशुरिति ब्रूयात्॥ न ग्राम्यान् पशून् हिवस्ति। नारण्यान्। चतुष्पथे

जुहोति। एष वा अग्नीनां षद्बीशो नाम। अग्निवत्येव जुहोति। मध्यमेन पर्णेन जुहोति। स्रुघ्येषा। अथोखलु अन्तमेनैव होतव्यम्। अन्तत एव रुद्रन्निरवदयते॥

rudro vā apaśukāyā āhutyai nā tiṣṭhata| asaute paśuriti nirdiśedyaṁ dviṣyāt| yameva dveṣṭi| tamasmai paśuṁ nirdiśati| yadi na dviṣyāt| ākhuste paśuriti brūyāt|| na grāmyān paśūn hivasti| nāraṇyān| catuṣpathe juhoti| eṣa vā agnīnāṁ ṣadbīśo nāma| agnivatyeva juhoti| madhyamena parṇena juhoti| srughyeṣā| athokhalu antamenaiva hotavyam| antata eva rudranniravadayate||

एषते रुद्रभागः सह स्वस्राऽम्बिकयेत्याह। शरद्वा अस्याम्बिका स्वसा। तयावा एष हिनस्ति। यगं हिनस्ति। तयैवैनगं सह शमयति॥

eṣate rudrabhāgaḥ saha svasrā'mbikayetyāha| śaradvā asyāmbikā svasā| tayāvā eṣa hinasti| yagṁ hinasti| tayaivainagṁ saha śamayati||

भेषजं गव इत्याह। यावन्त एव ग्राम्याः पशवः। तेभ्यो भेषजं करोति। अवाम्ब रुद्रमदिमहीत्याह। आशिषमेवैतामाशास्ते॥ त्र्यंबकं यजामह इत्याह। मृत्यो र्मुक्षीय माऽमृता दिति वावैत दाह। उत्किरन्ति। भगस्य लीप्सन्ते। मूते कृत्वाऽऽसजन्ति। यथाजनं यतेऽव सं करोति। तादृगेव तत्॥

bheṣajaṁ gava ityāha| yāvanta eva grāmyāḥ paśavaḥ| tebhyo bheṣajaṁ karoti| avāmba rudramadimahītyāha| āśiṣamevaitāmāśāste|| tryambakaṁ yajāmaha ityāha| mṛtyo rmukṣīya mā'mṛtā diti vāvaita dāha| utkiranti| bhagasya līphsante| mūte kṛtvā''sajanti| yathājanaṁ yate'va saṁ karoti| tādṛgeva tat||

एषते रुद्र भाग इत्याह निरवत्त्यै। अप्रतीक्षमायन्ति। अपः परिषिञ्चति। रुद्रस्यान्तर् हित्यै। प्र वा एतेऽस्मा ल्लोकाच्यवन्ते। ये त्र्यम्बकैश्चरन्ति॥ आदित्यं चरुं पुनरेत्य निर्वपति। इयं वा अदितिः। अस्यामेव प्रतितिष्ठन्ति।

eṣate rudra bhāga ityāha niravattyai| apratīkṣamāyanti| apaḥ pariṣijñcati| radrasyāntar hityai| pra vā ete'smā llokācyavante| ye tryambakaiścaranti|| ādityaṁ caruṁ punaretya nirvapati| iyaṁ vā aditiḥ| asyāmeva pratitiṣṭhanti|

विभ्राड् बृहत् पिबतु सोम्यं मध्वायु-र्धध-द्यज्ञवता-वविह्रुतं। वातजूतो यो अभिरक्षति त्मना प्रजाः पुपोष बहुधा विराजति॥

vibhrāḍ bṛhat pibatu soumyaṁ madhvāyu-rdhadha-dyajñavatā-vavihrutaṁ| vātajūto yo abhirakṣati tmanā prajāḥ pupoṣa bahudhā virājati||

ॐ नमो भगवते रुद्राय॥ प्रतिपूरुषं प्रतिपूरुषं विभ्राडिति नेत्रत्रयाय वौषट्॥

om namo bhagavate rudrāya|| pratipūruṣaṁ pratipūruṣaṁ vibhrāḍiti netratrayāya vauṣaṭ||